## ३ तृतीय दशकः - महाकाल्यवतारः

जगत्सु सर्वेषु पुरा विलीनेषु एकार्णवे शेषतनौ प्रसुप्ते ।
हरौ सुरारी मधुकैटभाख्यौ महाबलावप्सु विजहृतुर्द्वौ ॥ ३-१॥

समाः सहस्रं यतचित्त वृत्ती वाग्बीज मन्त्रं वरदे जपन्तौ ।
प्रसादिताया असुरौ भवत्याः स्वच्छन्द मृत्युत्व मवापतुस्तौ ॥ ३-२॥

एकाम्बुधौ तौ तरलो र्मिमाले निमज्जनो न्मज्जन केलि लोलौ ।
यदृच्छया वीक्षित मब्ज योनिं रणोत्सुका वूचतुरिद्ध गर्वौ ॥ ३-३॥

पद्मासनं वीरवरोपभोग्यं न भीरुभोग्यं न वराकभोग्यम् ।
मुञ्चेदमद्यैव न यासि चेत्त्वं प्रदर्शय स्वं युधि शौर्यवत्त्वम् ॥ ३-४॥

इदं समाकर्ण्य भयाद्विरिञ्चः सुषुप्ति निष्पन्द ममोघ शक्तिम् ।
प्रबोधनार्थं हरिमिद्ध भक्त्या तुष्टाव नैवाचल दम्बुजाक्षः ॥ ३-५॥

अस्पन्दता त्वस्य कयापि शक्त्या कृतेति मत्वा मतिमान् विरिञ्चः ।
प्रबोधयैनं हरिमेव मुक्त्वा स्तोत्रै र्विचित्रै र्भवती मनौषीत् ॥ ३-६॥

नुति प्रसन्ना ऽब्ज भवस्य तूर्णं निःसृत्य विष्णोः सकलाङ्गतस्त्वम् ।
दिवि स्थिता तत्क्षण मेव देवो निद्रा विमुक्तो हरिरुत्थितोऽभूत् ॥ ३-७॥

अथैष भीतं मधुकैटभाभ्यां विरिञ्च मालोक्य हरि र्जगाद ।
अलं भयेनाह मिमौ सुरारी हन्तास्मि शीघ्रं समरेऽत्र पश्य ॥ ३-८॥

एवं हरौ वक्तरि तत्र दैत्यौ रणोत्सुकौ प्राप तुरिद्ध गर्वौ ।
तयो रविज्ञाय बलं मुरारिः युद्धोद्यतोऽभू दजरक्षणार्थम् ॥ ३-९॥

बिभेमि रागादि महारिपुभ्यो जेतुं यतिष्येऽह मिमान् सुशक्तान् ।
तदर्थ शक्तिं मम देहि नित्यं निद्रालसो मा च भवानि मातः ॥ ३-१०॥

** कालि कालि महाकालि भद्रकालि नमोऽस्तु ते ।
कुलं च कुलधर्मं च मां च पालय पालय ॥ **